


अष्टमः पाठः

८

# बिलस्य वाणी न कदापि मे श्रुता

प्रस्तुत पाठ संस्कृत के प्रसिद्ध नीति कथाग्रन्थ *पञ्चतन्त्रम्* के तृतीय तन्त्र 'काकोलूकीयम्' से लिया गया है। *पञ्चतन्त्र* के रचयिता विष्णुशर्मा हैं। इस ग्रन्थ में पशु-पक्षियों के माध्यम से जीवनोपयोगी शिक्षाएँ दी गई हैं। इस कथा में एक सिंह और एक चतुर शृगाल की कहानी है। शृगाल अपनी बुद्धिमत्ता, प्रत्युत्पन्नमतित्व और समयानुकूल निर्णय लेकर आए हुए सङ्कट से स्वयं की रक्षा कर लेता है। यह पाठ हमें सिखाता है कि कठिन परिस्थिति में धैर्य और चातुर्य से कार्य करना चाहिए।

The given lesson has been taken from *Panchatantra*, the famous Sanskrit collection of moral stories, specifically from its third section, Kakolukiyam. The author of *Panchatantra* is Vishnu Sharma. Through stories involving animals and birds, this work imparts valuable lessons for life.This particular story tells of a lion and a clever jackal. By using his intelligence, presence of mind, and the ability to make decisions according to the situation, the jackal successfully protects himself from the danger that confronts him. The lesson teaches us that in difficult situations, one should act with patience, wisdom, and cleverness.

© NCERT not to be republished

कस्मिश्चित् वने खरनखरः नाम सिंहः प्रतिवसति स्म। सः कदाचित् इतस्ततः परिभ्रमन् क्षुधार्तः न किञ्चिदपि आहारं प्राप्तवान्। ततः सूर्यास्तसमये एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत्- "नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति। अतः अत्रैव निगूढो भूत्वा तिष्ठामि" इति।



एतस्मिन् अन्तरे गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्। सः च यावत् पश्यति तावत् सिंहपदपद्धतिः गुहायां प्रविष्टा दृश्यते, न च बहिरागता। शृगालः अचिन्तयत्– "अहो विनष्टोऽस्मि।" नूनम् अस्मिन् बिले सिंहः अस्तीति तर्कयामि। तत् किं करवाणि?– एवं विचिन्त्य दूरस्थः रवं कर्तुमारब्धः– "भो बिल! भो बिल! किं न स्मरसि, यन्मया त्वया सह समयः कृतोऽस्ति यत् यदाहं बाह्यतः प्रत्यागमिष्यामि तदा त्वं माम् आकारयिष्यसि? यदि त्वं मां न आह्वयसि तर्हि अहं द्वितीयं बिलं यास्यामि इति।"



अथ एतच्छ्रुत्वा सिंहः अचिन्तयत्–"नूनमेषा गुहा स्वामिनः सदा समाह्वानं करोति। परन्तु मद्भयात् न किञ्चित् वदति।"

अथवा साध्विदम् उच्यते–

**भयसन्त्रस्तमनसां हस्तपादादिकाः क्रियाः।**

**प्रवर्तन्ते न वाणी च वेपथुश्चाधिको भवेत्॥**

तदहम् अस्य आह्वानं करोमि। एवं सः बिले प्रविश्य मे भोज्यं भविष्यति। इत्थं विचार्य सिंहः सहसा शृगालस्य आह्वानमकरोत्। सिंहस्य उच्चगर्जन-प्रतिध्वनिना सा गुहा उच्चैः शृगालम् आह्वयत्। अनेन अन्येऽपि पशवः भयभीताः अभवन्। शृगालोऽपि ततः दूरं पलायमानः इममपठत्–

**अनागतं यः कुरुते स शोभते, स शोच्यते यो न करोत्यनागतम्।**

**वनेऽत्र संस्थस्य समागता जरा, बिलस्य वाणी न कदापि मे श्रुता॥**

## वयं शब्दार्थान् जानीमः

| संस्कृत | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| कस्मिश्चित् वने | कुत्रचित् अरण्ये | किसी (वन में) | In a certain forest | |
| क्षुधार्तः | बुभुक्षितः | भूख से व्याकुल | Hungry | |
| अन्तरे | मध्ये | बीच में | Meanwhile | |
| निगूढः | निलीनः | छिपा हुआ | Hidden | |
| सिंहपदपद्धतिः | सिंहस्य पदचिह्नानि | सिंह के पदचिह्न | Lion's footprints | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| रवः | ध्वनिः | आवाज | Sound | |
| यावत्-तावत् | यावन् कालः तावद् पर्यन्तम् | जब तक-तब तक | As long as | |
| समयः | पणः | शर्त | Condition | |
| बाह्यतः | बहिः | बाहर से | From outside | |
| यदि-तर्हि | यदि-चेत् | यदि-तो | If-then | |
| तच्छ्रुत्वा | तद् श्रुत्वा | वह सुनकर | Having heard that | |
| भयसन्त्रस्तमनसाम् | भयेन संत्रस्तं मनः येषां ते तेषां | डरे हुए मन वालों का | Of frightened persons | |
| हस्तपादादिकाः | हस्तौ पादौ इत्यादयः | हाथ-पैर आदि | Hands, feet etc. | |
| वेपथुः | कम्पनम् | कम्पन | Trembling | |
| भोज्यम् | खाद्यम् | भोजन | Food | |
| सहसा | झटिति | अचानक | Suddenly | |
| अनागतम् | भविष्यत् | आने वाला | To come | |
| शोच्यते | विचिन्त्यते | चिन्तनीय होता है | Is regretted | |
| संस्थस्य | स्थितस्य निवासं कुर्वतः | रहते हुए | Residing | |
| जरा | वृद्धावस्था | बुढ़ापा | Old age | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| बिलस्य | गुहायाः | बिल का | Of the cave | |
| पलायमानः | धावन् | भागता हुआ | Running away | |

## अत्र इदम् अवधेयम्

**१. भयसन्त्रस्तमनसां ............................ वेपथुश्चाधिको भवेत्।।**

**पदच्छेदः**– भयसन्त्रस्तमनसाम् हस्तपादादिकाः क्रियाः प्रवर्तन्ते न वाणी च वेपथुः च अधिकः भवेत्

**भावार्थः** – यदा जनः अत्यधिकं विभेति तदा भयात् हस्तपादयोः बहु कम्पनं भवति वाणी अपि अस्पष्टा भवति।

**२. अनागतं यः कुरुते ............................ न कदापि मे श्रुता।।**

**पदच्छेदः** – अनागतम् यः कुरूते सः शोभते। सः शोच्यते। यः न करोति अनागतम् वने अत्र संस्थस्य समागतम्।जरा बिलस्य वाणी न कदा अपि मे श्रुता

**भावार्थः** – यः अनगतां विपत्तिं बुद्धौ विचार्य कार्यं करोति, सः सुरक्षितः तिष्ठति। किन्तु भविष्यकालीन विपत्तिम् अविचिन्त्य कार्यं करोति सः चिन्तामग्नः भवति। आजन्म वने स्थित्वा मम वृद्धावस्था आगता परम् अहं कदापि बिलस्य वाणीं न श्रुतवान् अस्मि।

**३. अव्ययप्रयोगः**

**यथा**— १ बालकः पाठं पठितवान्
बालकेन पाठः पठितः

२ बालिका पाठं पठितवती
बालिकया पाठः पठितः

© NCERT not to be republished

**कर्तृवाच्ये** धातोः परं क्तवतु प्रत्ययस्य प्रयोगः भवति किन्तु **कर्मवाच्ये** 'क्त' प्रत्ययस्य प्रयोगः भवति

**कर्तृवाच्ये** – बालकः पाठं पठितवान्

**कर्मवाच्ये** – बालकेन पाठः पठितः

**कर्तृवाच्ये** – बालिका कवितां श्रुतवती

**कर्मवाच्ये** – बालिकया कविता श्रुता

**कर्तृवाच्ये** – वानरः फलं खादितवान्

**कर्मवाच्ये** – वानरेण फलं खादितम्।

**पदस्तरे** – पठितः पठितौ पठिताः

लिखितः लिखितौ लिखिताः इत्यादयः

© NCERT not to be republished

## वयम् अभ्यासं कुर्मः

**१. उदाहरणम् अनुसृत्य एकपदेन उत्तरं लिखत—**

**यथा—** **प्रश्नः** खरनखरः कुत्र वसति स्म?

**उत्तरम्** वने

क. सिंहस्य नाम किम्?

ख. गुहायाः स्वामी कः आसीत्?

ग. सिंहः कदा गुहायाः समीपे आगतः?

घ. हस्तपादादिकाः क्रियाः केषां न प्रवर्तन्ते?

ङ. गुहा केन प्रतिध्वनिता?

## २. उदाहरणमनुसृत्य पट्टिकातः अव्ययपदानि चित्वा वाक्यानि पूरयत

**सदा, बहिः, दूरम्, तावत्, तर्हि, तदा**

**यथा—** यदि वर्षा भवति, तर्हि वयं गृहे तिष्ठामः।

क. यदा सूर्यः उदेति, .................................... सर्वत्र प्रकाशः भवति।

ख. सूर्यः .................................... पूर्वदिशि एव उदेति।

ग. शृगालः गुहायाः .................................... आसीत्।

घ. सः यावत् पश्यति, .................................... सिंहपदपद्धतिः दृश्यते।

ङ. शृगालः ततः .................................... पलायमानः अभवत्।

च. यदि सफलताम् इच्छसि, .................................... आलस्यं त्यज।

## ३. रेखांकितपदानि आधृत्य यथोदाहरणं प्रश्नवाक्यनिर्माणं कुरुत—

**यथा— प्रश्नः** सिंहः सूर्यास्तसमये गुहाम् अपश्यत्।

**उत्तरम्** सिंहः कदा गुहाम् अपश्यत्?

क. खरनखरः <u>वने</u> प्रतिवसति स्म। ..............................................

ख. महतीं गुहां दृष्ट्वा <u>सिंहः</u> अचिन्तयत्। ..............................................

ग. शृगालः <u>भयेन</u> अचिन्तयत्। ..............................................

घ. शृगालः <u>दूरं</u> पलायितः। ..............................................

ङ. विचार्य सिंहः <u>शृगालस्य</u> आह्वानमकरोत्। ..............................................



## क्रियाकलापः

### १. वयं चर्चयामः (मौखिकम्)

क. 'संकटसमये धैर्यस्य महत्त्वम् भवति' इति भावं कथायाः अनुसारं चर्चयत।

ख. 'बुद्धिः बलात् श्रेष्ठा भवति' इति शृगालस्य बुद्धिमत्ताम् आधारीकृत्य परस्परं चर्चां कुरुत।

ग. भवतः जीवनस्य कमपि अनुभवं चर्चयत यदा प्रत्युत्पन्नमतित्वेन भवान् सङ्कटात् मुक्तः अभवत्।

© NCERT not to be republished





२. **वयं कुर्मः (लिखितम्)**

"यदि भवतः समक्षं भयस्य किमपि कारणं भवेत् तर्हि किं करिष्यति?" चिन्तयित्वा अनुच्छेदं लिखत।

.................................. .................................... ..............................

.................................. .................................... ..............................

**सिंहस्य चित्रं निर्माय तस्य विषये पञ्च संस्कृतवाक्यानि लिखत।**

क. ................................................

ख. ................................................

ग. ................................................

घ. ................................................

ङ. ................................................

© NCERT not to be republished